"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययोपदिष्टश्च हेत्वाभासस्तु पञ्चधा" ॥)

असिद्धिः, स्त्री, (न सिद्धिः । नञ्समासः ।) अनिष्पत्तिः । न्यायमते सा त्रिविधा । पक्षासिद्धिः १ यथा काञ्चनमयपर्व्वतो वह्निमान् इत्यादिः १ । स्वरूपासिद्धिः २ यथा, पर्व्वतः काञ्चनमयवह्निमान् इत्यादिः २ । व्याप्यत्वासिद्धिः ३ यथा, पर्व्वतो वह्निमान् ज्वलत्वादित्यादिः ३ । (यथा भाषापरिच्छेदे ।
"आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ।
व्याप्यतासिद्धिरपरा स्यादसिद्धिरतः त्रिधा ॥
पक्षासिद्धिर्यत्र पक्षो भवेत्काञ्चनमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्वादत्रासिद्धिरथापरा ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्" ।)

असिधावः, पुं, (असिं धावति निर्म्मलं करोतीति । असि + धाव + अण् ।) शस्त्रमार्ज्जकः । इति जटाधरः ॥ शिकलकर इति भाषा ।

असिधावकः, पुं, (असिधाव + स्वार्थे कन् ।) असिधारकर्त्ता । अस्त्रमार्ज्जकः । इत्यमरः ॥

असिधेनुः, स्त्री, (असिर्धेनुरिव यस्याः । असेर्धेनुसादृश्येन क्षुरिकाया स्तदल्पसादृश्यम् ।) क्षुरिका । इति हलायुधः ॥ छुरी इति भाषा ।

असिधेनुका, स्त्री, (असिर्धेनुका इव यस्याः ।) क्षुरिका । इत्यमरः ॥

असिपत्रः, पुं, (इक्षुपक्षे, असिरिव तीक्ष्णं पत्रं यस्य ।) इक्षुः । खड्गकोषः । नरकविशेषः । इति मेदिनी ॥ गुण्डनाम तृणं । इति राजनिर्घण्टः ॥

असिपत्रकः, पुं, (असिपत्र + कन् ।) इक्षुः । इति त्रिकाण्डशेषः ॥

असिपत्रवनं, स्त्री, (असिरिव तीक्ष्णं पत्रं यस्य तादृशं वनं ।) नरकविशेषः । "पत्रैर्यत्र विदार्य्यते" । इति मनुः ॥ ("यस्त्विह वै निजपथादनापद्यपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्रासावितस्ततो धावमानः उभयतोधारै स्तालवनासिपत्रैश्छिद्यमानसर्व्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्म्महा पाषण्डानुगमनफलं भुङ्क्ते" । इति श्रीभागवते ॥
"असिपत्रवनं नाम नरकं शृणु चापरम् ।
योजनानां सहस्रं वै ज्वलदग्न्यास्तृतावनिः ॥
तप्ता सूर्य्यकरैश्चण्डैः कल्पकालाग्निदारुणैः ।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः ॥
तन्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते ।
पत्राणि यत्र खड्गानि फलानि द्विजसत्तम" ॥
इति मार्कण्डेयपुराणे ।)

असिपुच्छकः, पुं, (असिरिव पुच्छो यस्य ।) शिशुमारः । इति हारावली ॥

असिपुत्त्रिका, स्त्री, (असेः पुत्त्रीव ।) क्षुरिका । इति हलायुधः ॥

असिपुत्त्री, स्त्री, (असेः पुत्त्रीव ।) इत्यमरः ॥ क्षुरिका ॥ छुरी इति भाषा ।

असिमेदः, पुं, (असिरिव मेदो निर्यासो यस्य ।) विट्खदिरः । इति शब्दरत्नावली ॥ (इरिमेदशब्देऽस्य गुणा ज्ञेयाः ॥)

असिहेतिः, पुं, (असिर्हेतिः प्रधानास्त्रं यस्य ।) खड्गधारी योद्धा । तत्पर्य्यायः । नैस्त्रिंशिकः २ । इत्यमरः ॥

असु, क्ली, (अस्यतेऽनेन । अस् + उ ।) चित्तं । उपतापः । इत्युणादिकोषः ॥

असुः, पुं, (अस्यन्ते इति । अस् + उ ।) प्राणः पञ्चप्राणेषु बहुवचनान्तः । असवः । इत्यमरः ॥ ("तेजस्विनः सुखमसूनपि संत्यजन्ति" । इति नीतिशतके । ९९ श्लोकः ।)

असुखं, क्ली, (न सुखम् । नञ्समासः ।) दुःखं । इति हेमचन्द्रः ॥
(यथा मनुसंहितायां १२ । १९ ।
"तौ धर्म्मं पश्यतस्तस्य पापं चातन्द्रितौ सह ।
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम्" ॥
तत्रैव ४ । ७० ।
"न कर्म्म निष्फलं कुर्य्यान्नायत्यामसुखोदयम्" ।)

असुधारणं, क्ली, (असूनां धारणं ।) जीवनं । इत्यमरः ॥

असुभृत्, त्रि, (असून् बिभर्त्तीति । असु + भृ + क्विप् ।) प्राणी । जीवः । यथा । "दृतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयोऽण्डमसृजन् यदनुग्रहतः" । इति श्रीभागवते दशमस्कन्धे ८७ अध्याये १४ श्लोकः ॥

असुरः, पुं, स्त्री, (अस्यति देवान् क्षिपति इति । अस + उरन् । यद्वा न सुरः विरोधे नञ्तत्पुरुषः । यद्वा नास्ति सुरा यस्य सः । सूर्य्यपक्षे असति दीप्यते इति उरन् ।) सुर विरोधी । स तु कश्यपात् दितिगर्भजातः । तत्पर्य्यायः । दैत्यः २ दैतेयः ३ दनुजः ४ इन्द्रारिः ५ दानवः ६ शुक्रशिष्यः ७ दितिसुतः ८ पूर्व्वदेवः ९ सुरद्विट् १० देवरिपुः ११ देवारिः १२ इत्यमरः ॥ ("सुराः प्रतिग्रहाद्देवाः सुरा इत्यभिविश्रुताः । अप्रतिग्रहणात्तस्य दैतेयाश्चासुराः स्मृताः" ॥ इति रामायणे ।) सूर्य्यः । इति मेदिनी । राहुः इति ज्योतिःशास्त्रम् ॥

असुररिपुः, पुं, (असुराणां रिपुः ।) विष्णुः । इति शब्दरत्नावली ॥

असुरसा, स्त्री, (न विद्यते सु शोभनो रसो यस्याः ।) वर्व्वरी । इति रत्नमाला । वावुइ तुलसी इति भाषा । (वर्व्वरीशब्देऽस्या विशेषो ज्ञातव्यः ॥)

असुरा, स्त्री, रात्रिः । राशिः । इति मेदिनी ॥

असुराह्वं, क्ली, (असुरस्याह्वा आह्वा यस्य ।) कांस्यं । इति हेमचन्द्रः ॥

असुरी, स्त्री, (अस् + उरन् + ङीष् ।) राजिका । इत्यमरटीकायां भरतादयः । राई सर्षा इति भाषा ॥ असुरपत्नी ॥ [दरः । इत्यमरः ।

असुर्त्तणं, क्ली, (न + सुर्त्त + ल्युट् ।) अवज्ञा । अना-

असुस्थः, त्रि, (न सुस्थः । नञ्समासः ।) सुखःस्थितिरहितः । रोगी ॥

असुर्त्तणं, क्ली, (न + सूर्त्त + ल्युट्) अवज्ञा । अनादरः । इत्यमरः ॥

असूया, स्त्री, (असू ञ असूयायाम् । असू + यक् + अ ।) गुणेषु दोषाविष्करणं । परगुणे दोषारोपणं इत्यमरः ॥ (यथा साहित्यदर्पणे ।
"असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ।
दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्" ॥
इयञ्च "हर्षासूया विषादाः" । इत्यादिना व्यभिचारिभावमध्येऽपि परिगणिता ॥)

असूर्य्यम्पश्या, स्त्री, (सूर्य्यमपि न पश्यति या । न + सूर्य्य + दृश + खश् । सत्यपि सूर्य्यदर्शने प्रयोगो भवति । यदा तु सूर्य्यदर्शनाभावमात्रम् सूर्य्येतरस्य चन्द्रादेर्दर्शनं वा विवक्षितं तदा खश् न भवति ।) राजपत्न्यादिः । इति कलापपाणिनी ॥ ("असूर्य्यम्पश्यरूपा त्वं किमभीरुररार्य्यसे" । इति भट्टिः ॥)

असूर्त्तणम्, असूर्त्तणं, } क्ली, (सूर्त्त आदरे तस्मात् ल्युट् ततो नञ्समासः ।) अनादरः । इत्यमरः ।

असृक्, [ज्] क्ली (न + सृज् + क्विप् ।) रक्तम् । इत्यमरः ॥ ("पानमप्यसृजः क्षिप्रं स्वपीड़ायै जलौकसाम्" । इति दृष्टान्तशतकम् ।) कुङ्कुमं । इति राजनिर्घण्टः ॥ विष्कुम्भादि सप्तविंशति योगान्तर्गतषोड़शयोगः ॥ तत्र जातफलं ।
"धनी कुरूपः कुमतिर्दुरात्मा
विदेशगामी रुधिरप्रकोपः ।
महाप्रलोभी पुरुषो वलीया-
नसृक् प्रसूतौ किल यस्य जन्तोः" ।
इति कोष्ठीप्रदीपः । रक्तार्थे यथा, वैद्यकं ॥
"रसासृक्मांसमेदोऽस्थि मज्जशुक्राणि धातवः" ।
"तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" ।
"वातासृक् पूर्व्वलक्षणं ।" इति माधवकरः ॥
"विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक् प्रदूषणं ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनं ॥
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनां ।
अभिघातादशुद्धेश्च नृणामसृजि दूषिते ॥
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गकः ।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत्" ॥
इति वाभटः ॥
"असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः" ।
"तद्वर्षाद्वादशात्काले वर्त्तमानमसृक् पुनः ।
जरापक्वशरीराणां यातिपञ्चाशतः क्षयं ॥
मदमूर्च्छा श्रमार्त्तानां वातविण्मूत्रसङ्गिनां ।
निद्राभिभूतभीतानां नृणां नासृक् प्रवर्त्तते" ॥
इति सुश्रुतः ॥)

असृक्करः, पुं, (असृक् शोणितं करोतीति । असृज् + कृ + ट ।) शरीरस्थधातुः । इति हेमचन्द्रः ॥ (भुक्तस्यान्नादिकस्य प्रथमं रसरूपता, रसस्य परिपाकतो रक्तरूपता इति वैद्यके प्रसिद्धिः । "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते" ॥ इति सुश्रुतः ॥)

असृक्पः, पुं, स्त्री, (असृक् पिबतीति । असृज् + पा + ड) राक्षसः इति हेमचन्द्रः ॥